# वैयाकरणसिद्धान्तकौमुदी

## हल्सन्धिप्रकरणम् (५)

# पुनरावर्तनम्

- अनुस्वारसन्धिः
- अनुस्वारस्य अपवादाः
  - मो राजि समः क्वौ
  - हे मपरे वा
  - यवलपरे यवला वेति वक्तव्यम्
  - नपरे नः
- ङ्णोः कुक्-टुक् शरि
- डः सि धुट्
- नश्च

# १३३. शि तुक् (८.३.३१)

- पदद्वयम् ।
- 'पदस्य' इति अधिक्रियते । 'नश्च' इत्यतः नः इति, 'हे मपरे वा' इत्यतः वा इति च अनुवर्तते ।
- पदस्य नः – षष्ठी = पदान्तस्य नकारस्य
- शि – सप्तमी = शकारे परे
- तुक् – प्रथमा = तुगागमः स्यात्
- पदान्तस्य नस्य शे परे तुग् वा स्यात् ।
- कित्त्वात् 'आद्यन्तौ टकितौ' इति नकारात् परः तुगागमः ।

- सन् शम्भुः
- सन् त् शम्भुः ('शि तुक्' – ८.३.३१)
- सन् च् शम्भुः ('स्तोः श्चुना श्चुः' – ८.४.४०)
- सञ् च् शम्भुः ('स्तोः श्चुना श्चुः' – ८.४.४०)
- सञ् च् छम्भुः ('शश्छोऽटि' – ८.४.६३)
- सञ्     छम्भुः ('झरो झरि सवर्णे' – ८.४.६५)

१) सञ्छम्भुः

- लोपाभावे,

१) सञ्च्छम्भुः

- छत्वाभावे,

१) सञ्च् शम्भुः

- तुगभावे

१) सञ् शम्भुः

जछौ जचछा जचशा जशाविति चतुष्टयम् ।
रूपाणामिह तुक्छत्वचलोपानां विकल्पनात् ॥

# १३४. ङमो ह्रस्वादचि ङमुण् नित्यम् (८.३.३२)

- पञ्च पदानि ।
- 'पदस्य' इति अधिक्रियते ।
- ह्रस्वात् – पञ्चमी = ह्रस्वात् परस्य
- ङमः – पञ्चमी = ङमः परस्य
- अचि – सप्तमी – षष्ठ्या विपरिणम्यते = अचः
- ङमुट् – प्रथमा = ङमुडागमः स्यात्
- नित्यम्
- ह्रस्वात् परः यः ङम्, तदन्तं यत् पदं, तस्मात् परस्य अचः नित्यं ङमुडागमः स्यात् ।

- ङमुट् = ङम् इति प्रत्याहारात् उकार-टकारौ अनुबन्धौ।
- ङम् = ङ्, ण्, न्
- ङुट्, णुट्, नुट् – टित् आगमाः
- ङुट् = ङकारागमः
- णुट् = णकारागमः
- नुट् = नकारागमः
- 'आद्यन्तौ टकितौ' इति परिभाषया सर्वेऽप्येते आदौ भवन्ति ।

प्रत्यङ् + आत्मा

| | | | |
|---|---|---|---|
| प्रत्य् | अ | ङ् | आ त्मा |
| | ह्रस्वः | ङम् | अच् |
| प्रत्य् | अ | ङ् | ङ्आ त्मा |

प्रत्यङ्ङात्मा

सुगण् + ईशः = सुगण् णईशः = सुगण्णीशः

सन् + अच्युतः = सन् न्अच्युतः = सन्नच्युतः

# १३५. समः सुटि (८.३.५)

- पदद्वयम् ।
- 'मतुवसो रु सम्बुद्धौ छन्दसि' (८.३.१) इत्यतः 'रु' इति अनुवर्तते ।
- समः – षष्ठी = सम्- इति उपसर्गस्य स्थाने
- सुटि – सप्तमी = सुटि परे
- रुः – प्रथमा = रुँ इत्यादेशः स्यात्
- समो रुः स्यात् सुटि ।
- 'अलोऽन्त्यस्य' इति अन्तादेशः ।
- रुँ – 'उपदेशेऽजनुनासिक इत्' इति उकारस्य इत्संज्ञा, तस्य लोपः ।

- सम् + कर्ता
- सम् + स् कर्ता ('सम्परिभ्यां करोतौ भूषणे' – ६.१.१३७ – इति कृञ्-धातोः सुडागमः)
- सर् + स् कर्ता ('समः सुटि' – ८.३.५ – इति रुत्वम्)

# १३६. अत्रानुनासिकः पूर्वस्य तु वा (८.३.२)

- अत्र रुप्रकरणे रोः पूर्वस्य अनुनासिको वा स्यात् ।
- सर् + स् कर्ता ('समः सुटि'  इति रुत्वम्)
- सँर् + स् कर्ता ('अत्रानुनासिकः पूर्वस्य तु वा')

# १३७. अनुनासिकात् परोऽनुस्वारः (८.३.४)

- अनुनासिकं विहाय रोः पूर्वस्मात् परः अनुस्वारागमः स्यात् ।
- सर् + स् कर्ता
- संर् + स् कर्ता

- खरवसानयोर्विसर्जनीयः (८.३.१५)
- खरि अवसाने च परे रेफस्य विसर्जनीयः स्यात् पदान्ते ।

# १३८. विसर्जनीयस्य सः (८.३.३४)

- ’खरवसानयोर्विसर्जनीयः’ इति सूत्रात् खरि इति अनुवर्तते ।
- खरि परे विसर्जनीयस्य सः स्यात् ।

- वा शरि (८.३.३६) – शरि परे विसर्जनीयस्य विसर्जनीय एव वा स्यात् ।

- एतदपवादे ’वा शरि’ इति पाक्षिके विसर्गे प्राप्ते ’संपुंकानां सो वक्तव्यः’ (वा)

| अनुनासिकपक्षे | अनुस्वारपक्षे |
| --- | --- |
| सँर् + स्कर्ता | संर् + स्कर्ता |
| सँ◌ः + स्कर्ता (खरवसानयोः विसर्जनीयः) | सं◌ः स्कर्ता (खरवसानयोः विसर्जनीयः) |
| सँस् + स्कर्ता (संपुंकानां सो वक्तव्यः) | संस् स्कर्ता (संपुंकानां सो वक्तव्यः) |
| १. सँस्स्कर्ता | २. संस्स्कर्ता |

’समो वा लोपमेके’ इति भाष्यम्

सम् + स्कर्ता
स + स्कर्ता (’समो वा लोपमेके’ इति मकारस्य लोपः)
लोपस्यापि रुप्रकरणस्थत्वात् अनुस्वारानुनासिकाभ्याम् एकसकारं रूपद्वयम् ।

३. सँस्कर्ता (अत्रानुनासिकः पूर्वस्य तु वा)
४. संस्कर्ता (अनुनासिकात् परोऽनुस्वारः)

द्विसकारं तु उक्तमेव ।

तत्र 'अनचि च' इति सकारस्य द्वित्वपक्षे त्रिसकारमपि रूपद्वयम् ।

| | | | |
|---|---|---|---|
| सँ | स् | स् | कर्ता |
| अच् | यर् | न अच् | |
| सँ | स् स् | स् | कर्ता |

५. सँस्स्स्कर्ता (अनचि च)

| | | | |
|---|---|---|---|
| सं | स् | स् | कर्ता |
| अच्? | यर् | न अच् | |

अनुस्वार-विसर्ग-जिह्वामूलीय-उपध्मानीयानाम् अकारोपरि शर्षु च पाठस्य उपसंख्यातत्वेन अनुस्वारस्यापि अच्त्वात् ।

| | | | |
|---|---|---|---|
| सं | स् स् | स् | कर्ता |

६. संस्स्स्कर्ता (अनचि च)

१. सँस्कर्ता
२. सँस्स्कर्ता
३. सँस्स्स्कर्ता

१. संस्कर्ता
२. संस्स्कर्ता
३. संस्स्स्कर्ता

# शरः खयः (वा)

- शरः परस्य खयः द्वे वा स्तः ।
- सँस्कर्ता

| | | | |
|---|---|---|---|
| सँ | स् | क् | अर्ता |
| | शर् | खय् | |
| सँ | स् | क् क् | अर्ता |

४. सँस्क्कर्ता
५. सँस्स्क्कर्ता
६. सँस्स्स्क्कर्ता

अनुनासिकवतां त्रयाणां 'शरः खयः' इति कद्वित्वे षट् ।

- संस्कर्ता – संस्क्कर्ता ('शरः खयः' इति ककारस्य द्वित्वम्)
- संस्स्कर्ता – संस्स्क्कर्ता
- संस्स्स्कर्ता – संस्स्स्क्कर्ता

- एषु षड्सु रूपेषु 'अनचि च' इति अनुस्वारस्य द्वित्वे द्वादश रूपाणि ।
- अनुस्वारवताम् अनुस्वारस्यापि द्वित्वे द्वादश ।

- अनुनासिकरूपाणि (६) + अनुस्वाररूपाणि (१२)

- एषामष्टादशानां तकारस्य द्वित्वे वचनान्तरेण पुनः द्वित्वे च एकतं द्वितं त्रितम् इति चतुष्पञ्चाशत् ।
- सँस्कर्ता

| | | | | |
|---|---|---|---|---|
| सँस्क् | अ | र् | त् | आ |
| | अच् | रेफः | यर् | |
| सँस्क् | अ | र् | त् त् | आ (अचो रहाभ्यां द्वे) |
| | | यण् | मय् | |
| सँस्क् | अ | र् | त् त् त् | आ (यणो मयो द्वे वाच्ये) |

- अणोऽनुनासिकत्वे अष्टोत्तरं शतम् ।
- संस्कर्ता
- संस्कर्ताँ ('अणोऽप्रगृह्यस्यानुनासिकः' – अप्रगृह्यस्य अणः अवसाने अनुनासिकः वा स्यात् )

- संस्कृतम् – कति रूपाणि?

# १३९. पुमः खय्यम्परे (८.३.६)

- पदत्रयम् । पुमः, खयि, अम्परे ।
- 'मतुवसो रु सम्बुद्धौ छन्दसि' इत्यतः 'रु' इति अनुवर्तते ।
- पुमः – षष्ठी = पुम्-शब्दस्य स्थाने
- अम्परे खयि – सप्तमी = अम्-परके खय्-वर्णे परे
- रुँ – प्रथमा = रुत्वं स्यात् ।
- अम्परे खयि पुम्-शब्दस्य रुः स्यात् ।

पुम् + कोकिलः

पुम् क् ओ किलः

खय् अम्

पुर् क् ओ किलः

पुँर् कोकिलः (अत्रानुनासिकः पूर्वस्य तु वा)

पुंर् कोकिलः (अनुनासिकात् परोऽनुस्वारः)

पुँ◌ः कोकिलः (खरवसानयोः विसर्जनीयः) पुं◌ः कोकिलः

# १३१. डः सि धुट् (८.३.२९)

- पदत्रयम् ।
- 'हे मपरे वा' इत्यतः वा इति अनुवर्तते ।
- 'उभयनिर्देशे पञ्चमीनिर्देशो बलीयान्' ।
- डः – पञ्चमी = डकारात् परस्य
- सि – सप्तमी – षष्ठ्या विपरिणम्यते = सकारस्य
- धुट् – प्रथमा = धुडागमः स्यात्
- डात् परस्य सस्य धुड् वा स्यात् ।
- 'आद्यन्तौ टकितौ' इति परिभाषया सकारस्य आदौ धुडागमः ।

- षष् सन्तः
- षड् सन्तः ('झलां जशोऽन्ते' – ८.२.३९ – इति जश्त्वम् )
- षड् ध् सन्तः ('डः सि धुट्' – ८.३.२९)
- षड् त् सन्तः ('खरि च' – ८.४.५५)
- षट् त् सन्तः ('खरि च' – ८.४.५५)
- धुडभावे,
- षट् सन्तः ('खरि च' – ८.४.५५)

# १३२. नश्च (८.३.३०)

- पदद्वयम् । नः, च ।
- 'डः सि धुट्' इत्यतः सि इति, धुट् इति च अनुवर्तते । 'हे मपरे वा' इत्यतः वा इति ।
- नः – पञ्चमी = नकारात् परस्य
- सि – सप्तमी – षष्ठ्या विपरिणम्यते = सकारस्य
- धुट् – प्रथमा = धुडागमः स्यात्
- नकारान्तात् परस्य सस्य धुड् वा स्यात् ।

- सन् सः
- सन् ध् सः ('नश्च' – ८.३.३०)
- सन् त् सः ('खरि च' – ८.४.५५)
- सन्त्सः
- धुडभावे,
- सन् सः